## मन्थिनस्सँस्रावहोमविधिः - नाभानेदिष्ठोपाख्यानम् (तै.सं. 3.1.9)

### मन्त्रपाठः

*ए॒ष ते॑ रुद्र भा॒गो य॒न्निर॒याँ॑चथा॒स्तञ्जु॑षस्व वि॒देर्गौ॑प॒त्यꣳ रा॒यस्पोष॑ꣳ सु॒वीर्य॑ꣳ सँव्व॒थ्स॒रीणा॑ꣳ स्व॒स्तिम् ।*

मनु॑ꣳ पु॒त्रेभ्यो॑ दा॒यँव्व्य॑भज॒थ्स नाभा॒नेदि॑ष्ठम्ब्र॒ह्म॒चर्यँ॒व्वस॑न्त॒न्निर॑भज॒थ्स आग॑च्छ॒थ्सौ॑ऽब्रवीत्क॒था मा॒ निर॑भागि॒ति न त्वा॒ निर॑भाक्ष॒मित्य॑ब्रवी॒दङ्गि॑रस इ॒मे स॒त्त्रमा॑सते॒ ते [29] सु॒व॒र्गँ॒ल्लो॒कन्न प्र जा॑नन्ति॒ तेभ्य॑ इ॒दम्ब्राह्म॑णम्ब्रूहि॒ ते सु॑व॒र्गँ॒ल्लो॒कय्यँन्तो॒ य ए॑षाम्प॒शव॒स्ताꣳस्ते॑ दास्य॒न्तीति॒ तदे॑भ्योऽब्रवी॒त्ते सु॑व॒र्गँ॒ल्लो॒कय्यँन्तो॒ य ए॑षाम्प॒शव॒ आस॒न्तान॑स्मा अददु॒स्तम्प॒शु॒भि॒श्चर॑न्तँय्यज्ञवा॒स्तौ रु॒द्र आग॑च्छ॒थ्सौ॑ऽब्रवी॒न्मम॒ वा इ॒मे प॒शव॒ इत्यदु॒र्वै [30] मह्य॑मि॒मानित्य॑ब्रवी॒न्न वै तस्य॒ त ई॑शत॒ इत्य॑ब्रवी॒द्यद्य॑ज्ञवा॒स्तौ हीय॑ते॒ मम॒ वै तदि॒ति तस्मा॑द्यज्ञवा॒स्तु नाभ्य॒वेत्य॒ꣳ सौ॑ऽब्रवीद्य॒ज्ञे मा भ॒जाथ॑ ते प॒शून्नाभि म॑ꣳस्य॒ इति॒ तस्मा॑ ए॒तम्म॒न्थिन॑स्सꣳस्रा॒वम॑जुहो॒त्ततो॒ वै तस्य॑ रु॒द्रꣳ प॒शून्नाभ्य॑मन्यत ==य॒त्रै॒तमे॒वँ॒व्वि॒द्वान्म॒न्थिन॑स्सꣳस्रा॒वञ्जुहोति॒== न तत्र॑ रु॒द्रꣳ प॒शून॒भि म॑न्यते ॥ [31]

### पदपाठः

मनु॑ः । पु॒त्रेभ्य॑ः । दा॒यम् । वीति॑ । अ॒भ॒ज॒त् । सः । नाभा॒नेदि॑ष्ठम् । ब्र॒ह्म॒चर्य॒मिति॑ ब्रह्म-च॒र्य॑म् । वस॑न्तम् । निरिति॑ । अ॒भ॒ज॒त् । सः । एति॑ । अ॒ग॒च्छ॒त् । सः । अ॒ब्र॒वी॒त् । 4 । क॒था । मा॒ । निरिति॑ । अ॒भा॒क् । इति॑ । 5 । न । त्वा॒ । निरिति॑ । अ॒भा॒क्ष॒म् । इति॑ । अ॒ब्र॒वी॒त् । अङ्गि॑रसः । इ॒मे । स॒त्त्रम् । आ॒स॒ते॒ । ते । [29] सु॒व॒र्गमिति॑ सुवः-गम् । लो॒कम् । न । प्रेति॑ । जा॒न॒न्ति॒ । तेभ्य॑ः । इ॒दम् । ब्राह्म॑णम् । ब्रू॒हि॒ । ते । सु॒व॒र्गमिति॑ सुवः-गम् । लो॒कम् । यन्त॑ः । ये । ए॒षा॒म् । प॒शव॑ः । तान् । ते॒ । दा॒स्य॒न्ति॒ । इति॑ । 2 । तत् । ए॒भ्यः॒ । अ॒ब्र॒वी॒त् । ते । सु॒व॒र्गमिति॑ सुवः-गम् । लो॒कम् । यन्त॑ः । ये । ए॒षा॒म् । प॒शव॑ः । आस॑न्न् । तान् । अ॒स्मै॒ । अ॒द॒दुः॒ । 3 । तम् । प॒शु॒भिरिति॑ प॒शु-भिः । चर॑न्तम् । य॒ज्ञ॒वा॒स्ताविति॑ यज्ञ-वा॒स्तौ । रु॒द्रः । एति॑ । अ॒ग॒च्छ॒त् । सः । अ॒ब्र॒वी॒त् । मम॑ । वै । इ॒मे । प॒शव॑ः । इति॑ । अदु॑ः । वै । [30] मह्य॑म् । इ॒मान् । इति॑ । अ॒ब्र॒वी॒त् । न । वै । तस्य॑ । ते । ई॒श॒ते॒ । इति॑ । अ॒ब्र॒वी॒त् । यत् । य॒ज्ञ॒वा॒स्ताविति॑ यज्ञ-वा॒स्तौ । हीय॑ते । मम॑ । वै । तत् । इति॑ । तस्मा॑त् । य॒ज्ञ॒वा॒स्त्विति॑ यज्ञ-वा॒स्तु । न । अ॒भ्य॒वेत्य॒मित्य॑भि-अ॒वेत्य॑म् । 2 । सः । अ॒ब्र॒वी॒त् । य॒ज्ञे । मा॒ । एति॑ । भ॒ज॒ । अथ॑ । ते॒ । प॒शून् । न । अ॒भीति॑ । म॒ꣳस्ये॒ । इति॑ । 3 । तस्मै॑ । ए॒तम् । म॒न्थिन॑ः । स॒ꣳस्रा॒वमिति॑ सं-स्रा॒वम् । अ॒जु॒हो॒त् । तत॑ः । वै । तस्य॑ । रु॒द्रः । प॒शून् । न । अ॒भीति॑ ।

अमन्यत । 4 । यत्र॑ । एतम् । एवम् । विद्वान् । मन्थिन॑: । स॒ꣳस्रावमिति॑ सम्-स्रावम् । जुहोति॑ । न । तत्र॑ । रुद्रः । पशून् । अभीति॑ । मन्यते ॥ [31]

## क्रमपाठः

मनु॑ᳲ पुत्रेभ्य॑: । पुत्रेभ्यो॑ दायम् । दायँ॑व्वि । व्य॑भजत् । अभजथ्स॑: । स नाभानेदि॑ष्ठम् । नाभानेदि॑ष्ठम्ब्रह्मचर्यँ॑म् । ब्रह्मचर्यँ॑व्वसन्त॑म् । ब्रह्मचर्यमिति॑ ब्रह्म-चर्यँ॑म् । वसन्त॑न्निः । निर॑भजत् । अभजथ्स॑: । स आ । आऽग॑च्छत् । अगच्छथ्स॑: । सौँ॑ऽब्रवीत् । अब्रवीत्कथा । कथा माँ॑ । मा निः । निर॑भाक् । अभागिति॑ । इति न । न त्वाँ॑ । त्वा निः । निर॑भाख्षम् । अभाख्षमिति॑ । इत्य॑ब्रवीत् । अब्रवीदङ्गि॑रसः । अङ्गि॑रस इमे । इमे सत्रम् । सत्रमा॑सते । आसते ते । ते सु॑वर्गम् । (29) सुवर्गँ॑ल्लोकम् । सुवर्गमिति॑ सुवः-गम् । लोकन्न । न प्र । प्र जा॑नन्ति । जानन्ति तेभ्य॑: । तेभ्य॑ इदम् । इदम्ब्राह्म॑णम् । ब्राह्म॑णम्ब्रूहि । ब्रूहि ते । ते सु॑वर्गम् । सुवर्गँ॑ल्लोकम् । सुवर्गमिति॑ सुवः-गम् । लोकँ॑य्यन्त॑: । यन्तो ये । य ए॑षाम् । एषाम्पशव॑: । पशवस्तान् । ताꣳस्तेँ॑ । ते दास्यन्ति । दास्यन्तीति॑ । इति तत् । तदे॑भ्यः । एभ्योऽब्रवीत् । अब्रवीत्ते । ते सु॑वर्गम् । सुवर्गँ॑ल्लोकम् । सुवर्गमिति॑ सुवः-गम् । लोकँ॑य्यन्त॑: । यन्तो ये । य ए॑षाम् । एषाम्पशव॑: । पशव आसन्न्॑ । आसन्तान् । तान॑स्मै । अस्मा अददुः । अददुस्तम् । तम्पशुभि॑: । पशुभिश्चर॑न्तम् । पशुभिरिति॑ पशु-भिः । चर॑न्तँय्यज्ञवास्तौ । यज्ञवास्तौ रुद्रः । यज्ञवास्ताविति॑ यज्ञ-वास्तौ । रुद्र आ । आऽग॑च्छत् । अगच्छथ्स॑: । सौँ॑ऽब्रवीत् । अब्रवीन्मम॑ । मम वै । वा इमे । इमे पशव॑: । पशव इति॑ । इत्यदु॑: । अदुर्वै । वै मह्यँ॑म् । (30) । मह्य॑मिमान् । इमानिति॑ । इत्य॑ब्रवीत् । अब्रवीन्न । न वै । वै तस्य॑ । तस्य ते । त ई॑शते । ईशत इति॑ । इत्य॑ब्रवीत् । अब्रवीद्यत् । यद्य॑ज्ञवास्तौ । यज्ञवास्तौ हीय॑ते । यज्ञवास्ताविति॑ यज्ञ-वास्तौ । हीय॑ते मम॑ । मम वै । वै तत् । तदिति॑ । इति तस्माँ॑त् । तस्माँ॑द्यज्ञवास्तु । यज्ञवास्तु न । यज्ञवास्त्विति॑ यज्ञ-वास्तु । नाभ्यवेत्यँ॑म् । अभ्यवेत्यꣳ सः । अभ्यवेत्यमित्य॑भि-अवेत्यँ॑म् । सौँ॑ऽब्रवीत् । अब्रवीद्यज्ञे । यज्ञे माँ॑ । मा । आ भ॑ज । भजाथ॑ । अथ॑ ते । ते पशून् । पशून्न । नाभि । अभि मꣳ॑स्ये । मꣳस्य इति॑ । इति तस्मैँ॑ । तस्मा॑ एतम् । एतम्मन्थिन॑: । मन्थिन॑स्सꣳस्रावम् । सꣳस्राव॑मजुहोत् । सꣳस्रावमिति॑ सं-स्रावम् । अजुहोत्तत॑: । ततो वै । वै तस्य॑ । तस्य॑ रुद्रः । रुद्रᳲ पशून् । पशून्न । नाभि । अभ्य॑मन्यत । अमन्यत यत्र॑ । यत्रैतम् । एतमेवम् । एवँ॑व्विद्वान् । विद्वान्मन्थिन॑: । मन्थिन॑स्सꣳस्रावम् । सꣳस्राव॑ञ्जुहोति॑ । सꣳस्रावमिति॑ सं-स्रावम् । जुहोति न । न तत्र॑ । तत्र॑ रुद्रः । रुद्रᳲ पशून् । पशूनभि । अभि म॑न्यते । मन्यत इति॑ मन्यते ॥ (31)